The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

# संस्कृतशास्त्रेषु नारी

Dr. Sushree Sasmita Pati
Assistant Professor,
School of Sanskrit, G.M.University, Sambalpur, Odisha,

**उपक्रमः-**

विश्वनिर्माणे स्त्रीणां विशिष्टं योगदानं विद्यते, यथा पुरुषाणाम्। एवमपि वक्तुं शक्यते यत् स्त्रीपुरुषयोः परस्परसहयोगेनैव विश्वनिर्माणं कल्पते। अतएव सामाजिकव्यवस्थायाः परिकल्पना अपि द्वयोरधीनैव इति ज्ञेयम्। संस्कृतवाङ्मये नारी क्वचित् देवतारूपेण क्वचित् शक्तिरूपेण क्वचित् मातृरूपेण क्वचित् प्रकृतिरूपेण क्वचित् अर्धाङ्गिनीरूपेण क्वचित् धात्रीरूपेण क्वचित् अबलारूपेण च यथोचितं यथावसरं परिलक्ष्यते। वैदिककालीना नारी सामाजिकव्यवस्थायां पुरुषसमाना आसीत् इति गार्गी मैत्रेयी लोपामुद्राप्रभृतीनां वर्णनानुसारं ज्ञायते। परं तु स्मृतिकालीना नारी तु अस्वतन्त्रा पठनपाठनादिशैक्षणिकक्षेत्रे वञ्चिता उपवर्णिता अस्ति ।

**स्त्रीणामधिकारचिन्तनम्** –

**बालया वा युवत्या वा वृद्धया वापि योषिता।**

**न स्वातन्त्र्येण कर्तव्यं किञ्चित् कार्यं गृहेष्वापि।**

**बाल्ये पितुर्वशे तिष्ठेत् पाणिग्रहणस्य यौवने।**

**पुत्राणां भर्तरि प्रेते न भजेत् स्त्रीस्वतन्त्रताम्॥**[1] **इति**

मनुस्मृतिवचनेन स्त्रीणां स्वतन्त्रः अधिकारो वर्जितः।

**स्त्रीणां श्रेष्ठता** –

यद्यपि अधिकारे स्वातन्त्र्यं वर्जितं स्त्रीणां तथापि स्मृतिकारैः तासां श्रैष्ठ्यं समुपवर्णितम् । तदाह गौतमः आचार्यः श्रेष्ठः गुरूणां मातेत्येके इति। एवं मनुरब्रवीत् –

**उपाध्यायान् दश आचार्य आचार्याणां शतं पिता।**

**सहस्रं तु पितृन् माता गौरवेणातिरिच्यते॥**[2] **इति**

अन्यदपि मनुराह –

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्रा फलाः क्रियाः॥**[3] **इति**

अनेन स्त्रियः देवताकल्पा इति ज्ञायते।

**स्त्रीणां कर्तव्यपरायणता** –

स्मृतिकाराः स्त्रीणां कर्तव्यपरायणतामधिकृत्य बहु प्रकाशयन्ति।तत्र मनुवचनमेवं भवति -

**अर्थस्य संग्रहे चैनां व्ययेचैव नियोज्यते।**

**शौचे न्नपङ्क्त्यां च परिणाह्यस्य वेक्षणे॥[4] इति**

अर्थसंग्रहे, तस्य व्ययीकरणे, आतिश्यसेवने, गृहसज्जीकरणे गृहशुद्धिकरणे च स्त्रीणां विशिष्टकर्तव्यता विद्यत इति तदर्थः। अतएव गृहिणी गृहमुच्यते इति मनुराह-

**अरक्षिता गृहे रुद्धाः पुरूषैराप्तकारिभिः।**

**आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः॥[5] इति**

स्त्रीणां कर्तव्यपरके कर्मणि पतिसेवनं मुख्यामिति श्रीमद्रामायणम् अनवरतं प्रकटयति। कौसलया सीतां प्रति कथयति - **मितं ददाति हि पिता माता मितं सुतः।**

**अमितस्य हि दातारं भर्तारं का न पूजयेत्।**

**स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते॥[6] इति**

एवं सीता अनसूयां प्रति आह –

**विदितं तु मयाप्येतह यथा नार्याः पतिर्गुरः।**

**पतिशुश्रूषणात् नार्या तर्पा नान्यत् विधीयते॥**

**सावित्री पतिशुश्रूषां कृत्वा स्वर्गेमहीयते।[7] इति**

अनसूया ब्रवीति सीतां प्रति –

**नगरस्थो वनस्थो वा पापो वा यदि वा शुभः।**

**यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः॥[8] इति**

एवं वनं प्रस्थातुं रामः प्रक्रमते तदा स सीतां नेतुं नैच्छत्। तदा तं प्रति आह सीता –

**यस्त्वया सह स स्वर्गः निरयो यस्त्वया विना।**

**इति जानन् परां प्रीतिं गच्छ राम मया सह॥[9] इति**

इदं च दिव्यचरितं स्त्रीणां समस्तसंस्कृतवाङ्मये पुष्कलं दृश्यते। मनुरपि वदति -

**वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।**

**पतिसेवा गुरौ वासो गृहार्थोग्नि परिक्रिया ॥[10] इति**

गृहस्थः पतिः पत्नीं विना यज्ञादिकर्मसु योग्यः न भवति। अतएव पाणिनिरपि पत्युः नो यज्ञसंयोगे इति पत्नीशब्दनिर्वचनावसरे यज्ञादिकरणे योग्या सहभागिनी स्त्री एव पत्नी इति निरूपयति। अयज्ञो वा एषः यो पत्नीकः इति श्रुतिरपि अनुमेव विषयं द्रढयति।

**दायभागः –**

दायो नाम सम्पत्तिविभाजनम्। सम्पत्तिविभाजनं स्त्रीणां विषये कथमस्तीति संस्कृतवाङ्मये धर्मशास्त्रे बहु विचारितमस्ति। अत्र सम्पत्तिः पैतृकसम्पत्तिरिति श्रुतिषु कथितमस्ति।

**स्त्रीधनं षोढा वर्णितमस्ति मनुस्मृतौ याज्ञवल्क्यस्मृतौ च ।** तथा हि

1-अध्याग्नि, 2- अध्यवाहिनकं, 3- प्रीतिकर्मणि प्रदत्तं, 4- भ्रातृद्वारा प्राप्तं, 5- पितृद्वारा प्राप्तं , 6- मातृद्वारा प्राप्तम् इति। यथा-

**पितृ मातृ पति भ्रातृ दत्तमध्यग्न्युपागतम्।आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम्।**

**बन्धुदत्तं तथा शुल्क ------ इति॥**[11]

एतदपि वर्णितमस्ति स्मृतिग्रन्थे यत् मातुः पितुश्च सम्पत्तौ पुत्रवत् पुत्रीणां समः अधिकारः विद्यते इति। तत्र मनुः प्राह –

**जनन्यां संस्थितायां तु सम सर्वे सहोदराः**

**भजेरन्मातृकं पित्र्यं स्यात्तस्य गृह्णीत नेतरः।**

**यास्तासां स्युर्दुहितरस्सतामामपि यथार्हतः**

**मातामह्या अन्यकिञ्चित्प्रदेयं प्रीतिपूर्वकम्॥**[12] **इति**

किं च मातुः धनं तन्मरणादनन्तरं तया कृतस्य ऋणस्य अपाकरणं कृत्वा पुत्र्यै दातव्यमिति स्मृतिकाराः ब्रुवन्ति। तथा चोक्तं –

**मातुर्दुर्हितरः शेषमृणात्। ताम्य ऋतेन्वयः।**[13] **इति**

एवं विज्ञानेश्वरोपि मन्यते यत् मातुः सम्पत्तिः पुत्र्या एव भवति, तत्रापि अविवाहितायै प्रथमं दद्यात् तदनन्तरं विवाहिताभ्यः स्त्रीभ्य इति।

किं च नारदस्मृतिकारः प्रकटयति-

**पुत्रश्च दुहिता चोभौ पितुः सन्तानकारकौ॥**

**या तस्य दुहिता तस्याः पित्र्यंशो भरणे मतः।**[14] **इति**

एवं पितुः मरणानन्तरं पत्युः मरणानन्तरं वा अधिकारविवेचनं बहु उपलभ्यते स्मृतिग्रन्थेषु। मिताक्षरायां अविवाहितकन्या, निर्धनाविवाहिताकन्या, सधनविवाहितकन्या इति अधिकारक्रमोपि वर्णितः।

**उपसंहारः-**

संस्कृतवाङ्मये धर्मशास्त्रग्रन्थे काव्यजगति च स्त्रीणां स्थानं समृद्धं सुपुष्कलं समग्रविकसितं दैवविलसितं सर्वपूज्यं च वर्णितमस्ति। नारीणां प्रसङ्गे संस्कृतशास्त्रेषु विविधालोचनं प्राप्यते। विविधशास्त्रेषु नारीचरित्रस्य समाजे परिवारे च वर्धनम् अधिकारादयश्च सम्यक् तया वर्णनम् अस्ति।

**पादटीका -**

1. मनुस्मृतिः- 5.147-148
2. मनु.- 2.145
3. मनु.-3.56
4. मनु.-9.11

5. मनु.-9.12
6. श्रीमद्रामायणम्- 2.39.30-28
7. श्रीमद्रामायणम्- 2.118.2-9-10
8. श्रीमद्रामायणम्- 2.118.23
9. श्रीमद्रामायणम्- 2.30.18
10. मनुस्मृतिः- 2.67
11. याज्ञवल्क्यस्मृतिः- 8.183-188
12. मनुस्मृतिः- 9.192-193
13. याज्ञवल्क्यस्मृतिः-व्यवहाराध्यायः 117
14. नारदस्मृतिः- दायभागः 50-27

**सहायकग्रन्थसूची** –

1. Dr. Urmila Rustagi, Manusmriti,2001, J.P.Publishing House, New Delhi
2. Justice Rama Jois, Ancient Indian law : Eternal values in Manusmriti, (Universal law publishing co.ltd)
3. Justice Rama Jois, Dharma: The global ethic (Bhavan's book University)
4. काणे, पि.भि., धर्मशास्त्र का इतिहास,2001, उत्तरप्रदेश हिन्दी संस्थान, लक्ष्नौ
5. रामायण, 2022, गीताप्रेस, गोरखपुर,

*****